१७

अस्त्रस्य वृत्तान्तः

प्रस्तावना

पूर्वपाठे नाटकस्य पारिभाषिकशब्दाः ज्ञाताः। तस्मिन् नान्दी सूत्रधारः नेपथ्यं स्वगतं प्रकाशम् इति केचित् प्रसिद्धाः शब्दाः ज्ञाताः। युद्धस्य वार्तां ज्ञात्वा कर्णः युद्धाय प्रस्थितः। मातुः कुन्त्याः वचने बद्धः, गुरुणा शप्तः कर्णः स्वस्य दुःखम् अन्तः सोढुम् असमर्थः शल्यराजाय निवेदयति। तत्र गुरुणाः कर्णः केन कारणेन शप्तः इति कर्णः स्वमुखेन शल्याय निवेदयति। अयमेव वृत्तान्तः अस्त्रस्य वृत्तान्तः इति कथ्यते।

उद्देश्यानि

अमुं पाठं पठित्वा भवान् -

- कर्णस्य गुरुसमीपं गमनं ज्ञास्यति।
- कर्णः मिथ्या उक्त्वा कथं गुरुसकाशात् अस्त्रविद्याम् अर्जितावन् इति ज्ञास्यति।
- कर्णस्य गुरुः कर्णस्य मिथ्यात्वं ज्ञात्वा कर्णं किं शपति इति अवगच्छेत्।
- केषाञ्चित् कृदन्तरूपाणां प्रकृतिप्रत्ययनिर्णयं कर्तुं शक्ष्यति।
- केषाञ्चित् शब्दानाम् अमरकोषे समानार्थान् शब्दान् ज्ञास्यति।

१७.१) मूलपाठम् अवगच्छाम

शल्यः — ममाप्यस्ति कौतूहलमेनं वृत्तान्तं श्रोतुम्।

कर्णः — पूर्वमेवाहं जामदग्न्यस्य सकाशं गतवानस्मि।

शल्यः — ततस्ततः

कर्णः — ततः

विद्युल्लताकपिलतुङ्गजटाकलाप-
मुद्यत्प्रभावलयिनं परशुं दधानम्।
क्षत्रान्तकं मुनिवरं भृगुवंशकेतुं
गत्वा प्रणम्य निकटे निभृतः स्थितोऽस्मि॥१॥

व्याख्या

श्लोकान्वयः - विद्युल्लताकपिलतुङ्गजटाकलापम् उद्यत्प्रभावलयिनं परशुं दधानं क्षत्रान्तकम् भृगुवंशकेतुं मुनिवरं गत्वा प्रणम्य निकटे निभृतः स्थितः अस्मि॥९॥

व्याख्या - विद्युदिति- विद्युल्लताकपिलतुङ्गजटाकलापं विद्युत् च इयं लता विद्युल्लता तडिद्वल्ली, तद्वत् कपिलः पिङ्गवर्णः, तुङ्गः महान्, जटायाः कलापः समूहः विस्तृतिः वा यस्य सः। उद्यत्प्रभावलयिनम् उद्यन्ती उदीयमाना प्रभा कान्तिः, तस्याः वलयम् अस्ति अस्य तं प्रद्योतितकान्तिपरिधिमन्तम्। परशुं कुठारम्, दधानं धारयन्तम्, क्षत्रान्तकं क्षत्रियाणाम् अन्तकारकम्, भृगुवंशकेतुं भार्गवकुलश्रेष्ठम्, मुनिवरं तपस्विषु श्रेष्ठम्, गत्वा उपसृत्य, प्रणम्य नमस्कृत्य च निकटे सन्निधौ निभृतः मौनम् अवलम्ब्य तूष्णीं स्थितः अस्मि अभवम्। वसन्ततिलकवृत्तम्॥९॥

सरलार्थः - शल्यः तदा कथयति यत् तस्य अपि अस्त्रवृत्तान्तम् श्रोतुं बहु कुतूहलम् अस्ति। कर्णः कथयति यत् सः पूर्वं परशुरामस्य सकाशं गतवान्। तस्य विद्युल्लतावत् कपिलवर्णः महान् जटाकलापः, हस्ते च उज्ज्वलधारः कुठारः। तम् क्षत्रियविनाशकं भृगुवंशश्रेष्ठं तपस्विनं गत्वा प्रणम्य च निकटे तूष्णीं स्थितः कर्णः।

व्याकरणविमर्शः -

- गत्वा - √गम् + क्त्वा-प्रत्यये। (गम्लृ गतौ)
- प्रणम्य – प्र-√नम् + क्त्वा (ल्यप्) - प्रत्यये। (णम प्रह्वत्वे शब्दे च)
- विद्युत् - तडित्सौदामिनी विद्युच्चञ्चला चपला अपि इत्यमरः।

१७.२) मूलपाठम् अवगच्छाम

शल्यः — ततस्ततः।

कर्णः — ततो जामदग्न्येन ममाशीर्वचनं दत्त्वा पृष्टोऽस्मि। को भवान् किमर्थमिहागत इति।

शल्यः — ततस्ततः।

कर्णः — ततः भगवन्! अखिलान्यस्त्राण्युपशिक्षितुमिच्छामीत्युक्तवानस्मि।

शल्यः — ततस्ततः।

कर्णः — तत उक्तोऽहं भगवता ब्राह्मणेषूपदेशं करिष्यामि न क्षत्रियाणामिति।

शल्यः — अस्ति खलु भगवतः क्षत्रियवंश्यैः पूर्ववैरम्। ततस्ततः।

कर्णः — ततो नाहं क्षत्रिय इत्यस्त्रोपदेशं ग्रहीतुमारब्धं मया।

शल्यः — ततस्ततः।

कर्णः — ततः कतिपयकालातिक्रमे कदाचित् फलमूलसमित्कुशकुसुमाहरणाय गतवता गुरुणा सहानुगतोऽस्मि।

शल्यः — ततस्ततः।

कर्णः — ततः स गुरुर्वनभ्रमणपरिश्रमान्मदङ्के निद्रावशमुपगतः।

शल्यः — ततस्ततः।

कर्णः — ततः।

कृत्ते वज्रमुखेन नाम कृमिणा दैवान्ममोरुद्वये
निद्राच्छेदभयादसह्यत गुरोर्धैर्यात् तदा वेदना।
उत्थाय क्षतजाप्लुतः स सहसा रोषानलोद्दीपितो
बुद्ध्वा मां च शशाप कालविफलान्यस्त्राणि ते सन्त्विति॥१०॥

व्याख्या

व्याख्या - कतिपयकालातिक्रमे- कतिपयस्य कालस्य समयस्य अतिक्रमे अतिगमे। फलमूलसमित्कुशकुसुमाहरणाय- फलानि च मूलानि च समिधः च कुशाः च कुसुमानि च फलमूलसमित्कुशकुसुमानि, तेषाम् आहरणाय संग्रहणाय। वनभ्रमणपरिश्रमात् वनस्य अरण्यस्य भ्रमणम् वनभ्रमणम्, तस्मात् परिश्रमः क्लेषः, तस्मात्।

श्लोकान्वयः - दैवात् वज्रमुखेन कृमिणा मम ऊरुद्वये कृत्ते सति तदा गुरोः निद्राच्छेदभयात् धैर्यात् वेदना असह्यत। ततः क्षतजाप्लुतः सः उत्थाय सहसा रोषानलोद्दीपितः मां बुद्ध्वा ते अस्त्राणि कालविफलानि सन्तु इति (मां) शशाप॥१०॥

व्याख्या - कृत्ते इति- दैवात् अदृष्टवशात्, वज्रमुखेन वज्रवत् मुखं यस्य तथाभूतेन, कृमिणा कीटेन, मम कर्णस्य ऊरुद्वये कृत्ते विदारिते दष्टे सति तदा तस्मिन् समये, गुरोः परशुरामस्य निद्राच्छेदभयात् निद्रायाः स्वापस्य च्छेदः भङ्गः तस्मात् भयं सन्त्रासः तस्मात्, धैर्यात् अविक्लवात् धैर्यम् आलम्ब्य वेदना कृमिदंशनपीडा असह्यत सहनम् अक्रियत। ततः क्षतजाप्लुतः क्षतजेन रुधिरेण आप्लुतः आर्द्रगात्रः, सः महर्षिः, उत्थाय स्वापं विमुच्य सहसा झटिति रोषानलोद्दीपितः रोषः एव अनलः अग्निः, तेन उद्दीपितः जाज्वल्यमानः, माम् कर्णं क्षत्रियमिति बुद्ध्वा ज्ञात्वा ते तव कर्णस्य अस्त्राणि आयुधानि कालविफलानि काले प्राप्तावसरे विफलानि निरर्थकानि सन्तु भवन्तु इति एवं रूपं शशाप शापं दत्तवान्। अस्मात् कारणात् तानि विस्मृतानि इति भावः। शार्दूलविक्रीडितं छन्दः॥१०॥

सरलार्थः - कर्णं तूष्णीं स्थितं दृष्ट्वा परशुरामः आशीर्वचनं प्रदाय किमर्थं सः आगतः इति पृष्टवान्। कर्णः तदा विनिवेदितवान् यत् अहम् अखिलानि अस्त्रशास्त्राणि शिक्षितुम् इच्छामि इति। तदा परशुरामः उक्तवान् यत् ब्राह्मणान् शिक्षयामि, न तु क्षत्रियान् इति। यतः हि क्षत्रियैः सह अस्ति तस्य पूर्ववैरम्। तदा अहं क्षत्रियः नास्मि, अहं ब्राह्मणः अस्मि इति मिथ्यावचनम् उक्त्वा कर्णः अस्त्रविद्यां शिक्षितुम् आरब्धवान्। ततः एकस्मिन् दिवसे फलमूलसमित्कुशकुसुमादीनाम् आहरणाय गुरुणा

परशुरामेण सह गतवान्। गुरुः वनभ्रमणपरिश्रमेण कर्णस्य अङ्के निद्रातुम् आरब्धवान्। अदृष्टवशात् बज्रमुखः नाम कृमिः तस्य ऊरुयुगले दष्टवान्। परन्तु गुरोः निद्राव्याघातः स्यात् इति विचिन्त्य स कृमिदंशनपीडां सोढवान्। परन्तु क्षतजेन रुधिरेण आर्द्रगात्रः गुरुः निद्रातः उत्थाय सर्वं विज्ञाय क्रुद्धः सन् शापम् दत्तवान् यत् युद्धकाले तव अस्त्राणि विफलानि भविष्यन्ति इति।

व्याकरणविमर्शः -

- उपशिक्षितुम् - उप√शिक्ष् + तुमुन्-प्रत्यये। (शिक्ष विद्योपादाने)
- ग्रहीतुम् - √ग्रह्+ तुमुन्-प्रत्यये। (ग्रह उपादाने)
- असह्यत - √सह् + कर्मणि लङि प्रथमपुरुषैकवचने। (षह मर्षणे)
- उत्थाय - उत्√स्था + क्त्वा (ल्यप्) - प्रत्यये। (ष्ठा गतिनिवृत्तौ)
- शशाप - √शप् + लिटि प्रथमपुरुषैकवचने। (शप आक्रोशे)
- सहसा - अतर्किते तु सहसा स्यात् इत्यमरः।
- वेदना - आक्रोशनमभीषङ्गः संवेदो वेदना न ना इत्यमरः।

पाठगतप्रश्नाः-१

१. कर्णस्य माता का?

२. कर्णः अस्त्रशिक्षार्थम् कस्य समीपं गतवान्?

३. जामदग्न्यः केभ्यः अस्त्रशिक्षाम् उपदिशति?

४. किन्नामकेन कृमिणा कर्णस्य ऊरुद्वयं दष्टम्?

५. परशुरामः कं शापं दत्तवान् कर्णाय?

१७.३) मूलपाठम् अवगच्छाम

शल्यः — अहो कष्टमभिहितं तत्रभवता।

कर्णः — परीक्षामहे तावदस्त्रस्य वृत्तान्तम्। (तथा कृत्वा) एतान्यस्त्राणि निर्वीर्याणीव लक्ष्यन्ते। अपि च —

इमे हि दैन्येन निमीलितेक्षणा
मुहुः स्खलन्तो विवशास्तुरङ्गमाः।
गजाश्च सप्तच्छददानगन्धिनो
निवेदयन्तीव रणे निवर्तनम्॥११॥

व्याख्या

श्लोकान्वयः - हि दैन्येन निमीलितेक्षणाः मुहुः स्खलन्तः विवशाः इमे तुरङ्गमाः सप्तच्छददानगन्धिनः गजाः च रणे निवर्त्तनं निवेदयन्ति इव॥११॥

व्याख्या - निर्वीर्याणि सामर्थ्यरहितानि।

इमे इति - हि यतः दैन्येन दीनताम् आपन्नेन कातरतया इत्यर्थः, निमीलितेक्षणाः निमीलितानि मुद्रितानि ईक्षणानि नयनानि यैस्ते, अत एव मुहुः भूयः स्खलन्तः मार्गच्युताः सन्तः, विवशाः पराधीनाः, इमे पुरतो वर्तमानाः, तुरङ्गमा घोटकाः अश्वाः, सप्तच्छददानगन्धिनः - सप्तच्छदस्य दान इव गन्धः अस्ति एषाम् इति सप्तपर्णगन्धतुल्यमदस्राविणः गजाः, हस्तिनः च रणे संग्रामे निवर्तनं परावर्तनं पराभवमिति भावः, निवेदयन्ति संसूचयन्ति इव। रणाभिमुखं गच्छन्तः अश्वाः हस्तिनः च मे रणात् निवर्तनं सूचयन्ति, न तु गमनम् इति भावः। वंशस्थवृत्तम्॥११॥

सरलार्थः - इमं वृत्तान्तं निशम्य शल्यराजः दुःखितः अभवत्। कर्णः अस्त्रस्य वृत्तान्तः यथार्थः संवृत्तः न वा इति परीक्षितुम् आरब्धवान्। स दृष्टवान् यत् अस्त्राणि सामर्थ्यरहितानि इव दृश्यन्ते। अश्वानां नयनानि मुद्रितानि भवन्ति, धावितुं तेषाम् उत्साहः नास्ति, तस्मात् ते स्खलन्तः सन्ति। हस्तिनः च दुर्गन्धयुक्तं मदं श्रावयन्तः रणात् निवर्तनम् इच्छन्ति।

व्याकरणविमर्शः -

- कष्टम् - स्यात् कष्टं कृच्छ्रमाभीलम् इत्यमरः।
- वृत्तान्तः - वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यात् इत्यमरः।

१७.४) मूलपाठम् अवगच्छाम

कर्णः — शङ्खदुन्दुभयश्च निःशब्दाः।

शल्यः — भोः कष्टं किं नु खल्विदम्।

कर्णः — शल्यराज! अलमलं विषादेन।

हतोऽपि लभते स्वर्गं जित्वा तु लभते यशः।
उभे बहुमते लोके नास्ति निष्फलता रणे॥१२॥

व्याख्या

श्लोकान्वयः - रणे (वीरः) हतः अपि स्वर्गं लभते, जित्वा यशः लभते, लोके उभे बहुमते। रणे निष्फलता नास्ति॥१२॥

व्याख्या - हतोऽपि इति - रणे संग्रामे, (वीरः योद्धा) हतः अपि मृत्युं प्राप्तः अपि स्वर्गं स्वर्गलोकं लभते, प्राप्नोति। किञ्च, जित्वा विजित्य तु यशः कीर्तिं लभते प्राप्नोति, लोके भुवने वीराणां कृते उभे अपि स्वर्गयशसी बहुमते अभीष्टे, अतः रणे निष्फलता फलराहित्यं नास्ति न वर्तते, उभयथा लाभ एव। अनुष्टुप् छन्दः॥१२॥

सरलार्थः - कर्णः युद्धे स्वस्य अशुभलक्षणं संसूचयन् आह- दुन्दुभिशब्दः अपि न श्रूयते इति। शल्यराजः कष्टं प्रकाशयति। कर्णः तं सान्त्वयति, कथयति च - विषादः मास्तु इति। ततः कर्णः युद्धे अशुभलक्षणानि न गण्यानि मन्यमानः रणे वीराणां कृते जयपराजययोः उभयोः साफल्यं प्रदर्शयति - युद्धे हतः भवति चेत् स्वर्गः लभ्यते, जयं लभ्यते चेत् यशः लभ्यते। अतः रणे निष्फलता नास्ति इति।

व्याकरणविमर्शः -

- **वाच्यान्तरम्** - हतः अपि स्वर्गं लभते (कर्तरि) - हतेन अपि स्वर्गः लभ्यते (कर्मणि)।
- रणे निष्फलता न अस्ति (कर्तरि) - रणे निष्फलतया न भूयते (भावे)।

१७.५) मूलपाठम् अवगच्छाम

कर्णः — अपि च

इमे हि युद्धेष्वनिवर्तिताशा
हया सुपर्णेन समानवेगाः।
श्रीमत्सु काम्बोजकुलेषु जाता
रक्षन्तु मां यद्यपि रक्षितव्यम्॥१३॥

व्याख्या

श्लोकान्वयः - हि युद्धेषु अनिवर्तिताशाः सुपर्णेन समानवेगाः श्रीमत्सु काम्बोजकुलेषु जाताः इमे हयाः यद्यपि मया रक्षितव्यम् तथापि ते (इदानीं) मां रक्षन्तु॥१३॥

व्याख्या - इमे इति- हि यतः, युद्धेषु संग्रामेषु, अनिवर्तिताशाः अनिवर्तिता सफला आशा येषाम् ते, सुपर्णेन विहगेन समानवेगाः समानः वेगः येषां ते, विहगतुल्यद्रुतवेगाः इत्यर्थः। श्रीमत्सु श्रीः अस्ति येषु तेषु श्रीप्रदायिषु काम्बोजकुलेषु काम्बोजदेशोत्पन्नवंशेषु लोके काबुली इति ख्यातिं गतेषु जाताः प्रादुर्भूताः इमे संग्रामे वर्तमानाः, हयाः अश्वाः, यद्यपि मया रक्षितव्यं रक्षितुं योग्याः, तथापि ते एव (इदानीम् अस्मिन् युद्धकाले) मां कर्णं रक्षन्तु रक्षां कुर्वन्तु। उपजातिवृत्तम्॥१३॥

सरलार्थः - इदानीं स्वकीयं शुभलक्षणं प्रशंसन् आह कर्णः - एते अश्वाः युद्धे आशाम् न त्यजन्ति, एते गरुडसदृशाः द्रुतवेगाः, काम्बोजदेशे जाताः। यद्यपि एते अश्वाः कर्णेन रक्षणीयाः, तथापि ते एव इदानीं युद्धे कर्णं रक्षन्तु इति कर्णस्य प्रार्थना।

व्याकरणविमर्शः -

- रक्षितव्यम् - √रक्ष् + तव्य-प्रत्यये। (रक्ष पालने)
- सुपर्णः - नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः इत्यमरः।

१७.६) मूलपाठम् अवगच्छाम

कर्णः — अक्षयोऽस्तु गोब्राह्मणानाम्। अक्षयोऽस्तु पतिव्रतानाम्। अक्षयोऽस्तु रणेष्वपराङ्मुखानां योधपुरुषाणाम्। अक्षयोऽस्तु मम प्राप्तकालस्य। एष भोः प्रसन्नोऽस्मि।

समरमुखमसह्यं पाण्डवानां प्रविश्य
प्रथितगुणगणाढ्यं धर्मराजं च बद्ध्वा।
मम शरवरवेगैरर्जुनं पातयित्वा
वनमिव हतसिंहं सुप्रवेशं करोमि॥१४॥

शल्यराज! यावद्रथमारोहावः।

शल्यः — बाढम्।

(उभौ रथारोहणं नाटयतः)

कर्णः — शल्यराज! यत्रासावर्जुनस्तत्रैव चोद्यतां मम रथः।

व्याख्या

व्याख्या - गोब्राह्मणानाम्- गावः च ब्राह्मणाः च तेषां गोविप्राणाम्, अक्षयः संवृद्धिः, अस्तु भवतु। पतिव्रतानां मनसा वाचा कर्मणा पतिपरायणानां साध्वीनां नारीणाम्। रणेषु युद्धेषु अपराङ्मुखानां अपृष्ठदर्शिनां योधपुरुषाणां वीरपुरुषाणाम्। प्राप्तकालस्य प्राप्तः कालः अन्तकः यमः यस्य तस्य मम कर्णस्य अक्षयः विनाशराहित्यम् अस्तु भूयात्।

श्लोकान्वयः - पाण्डवानाम् असह्यं समरमुखं प्रविश्य प्रथितगुणगणाढ्यं धर्मराजं बद्ध्वा च मम शरवरवेगैः अर्जुनं पातयित्वा हतसिंहं वनम् इव सुप्रवेशं करोमि॥१४॥

व्याख्या - समरेति - पाण्डवानां पाण्डूपुत्राणाम्, असह्यं सर्वथा सोढुम् अशक्यम्, समरमुखं रणाभिमुखं प्रविश्य प्रवेशं कृत्वा, प्रथितगुणगणाढ्यं प्रथितेन प्रसिद्धेन गुणगणेन गुणसमूहेन आढ्यं सम्पन्नम्, धर्मराजं युधिष्ठिरम्, बद्ध्वा बन्धनं विधाय पाशैः इति शेषः, किं च मम कर्णस्य शरवरवेगैः - शरेषु वराः बाणश्रेष्ठाः, तेषां वेगाः प्रवाहाः तैः, अर्जुनम् एतन्नामकं मध्यमपाण्डवं पातयित्वा निपात्य हत्वा, हतसिंहं हतः सिंहः यस्मिन् तत् विनष्टमृगपतिं वनम् अरण्यम् इव यथा सुप्रवेशम् सुखं प्रवेशयोग्यं रणस्थलमिति शेषः, करोमि विदधामि। मालिनीवृत्तम् ॥१४॥

सरलार्थः - स्वस्य शुभं चिन्तयन् सर्वेषां कृते कल्याणं भवतु इति प्रार्थयति कर्णः। तेन उच्यते - गवा, ब्राह्मणानाम्, पतिव्रतानां नारीणाम्, रणेषु अपराङ्मुखानां योद्धृणाम्, मम कर्णस्य च अक्षयः अस्तु इति। इदानीं प्रसन्नः सन् कर्णः शल्यं प्रति तस्य चिकीर्षितं वदति यत् पाण्डवानां युद्धस्थलं प्रविश्य प्रख्यातगुणशालिनं धर्मराजं युधिष्ठिरं बद्ध्वा मध्यमपाण्डवम् अर्जुनं शरवर्षणेन हनिष्यामि। तेन च यथा वने सिंहः हतः चेत् तद्वनं सर्वेषां कृते निर्भयेन प्रवेशयोग्यं भवति, तद्वत् पाण्डवानां युद्धस्थलं सर्वेषां कृते प्रवेशयोग्यं भविष्यति इति।

व्याख्या - बाढं निश्चयेन। चोद्यतां सम्प्रेर्यताम्।

व्याकरणविमर्शः -

- प्रविश्य – प्र-√विश् + क्त्वा (ल्यप्) - प्रत्यये। (विश प्रवेशने)
- पातयित्वा - √पा+ णिच् + क्त्वा-प्रत्यये। (पत्लृ गतौ)
- वनम् - अटव्यरण्यं विपिनं गहनं काननं वनम् इत्यमरः।

पाठगतप्रश्नाः-२

६. रणे जये पराजये च विफलता नास्ति किमर्थम्?

७. कर्णस्य हयाः कस्मिन् देशे जाताः।

८. पाण्डवेषु कं हन्तुम् कर्णः इच्छति?

पाठसारः

➢ अस्मिन् पाठे मुख्यविषयः अस्ति कर्णस्य अस्त्रविद्यालाभाय गमनम्। गुरुसकाशाद् विद्याप्राप्तिः। गुरोः शापः च। अयमेव अस्त्रवृत्तान्तः। कर्णस्वमुखेन शल्यराजं श्रावयति। संक्षेपेण स एव अधस्तात् उपन्यस्तः।

➢ कर्णः अस्त्रवृत्तान्तं कथयति -

➢ अस्त्रवृत्तान्तः - पूर्वं कर्णः परशुरामसकाशं गत्वा प्रणम्य निकटे तूष्णीं स्थितः। ततः परशुरामः पृष्टवान्- किमर्थं भवान् इह आगतः असि इति। ततः कर्णः निवेदितवान् यत् अखिलाम् अस्त्रविद्यां शिक्षितुम् अहम् आगतवान् इति। ततः परशुरामः उक्तवान् यत् ब्राह्मणान् शिक्षयामि, न क्षत्रियान् इति। ततः अहं क्षत्रियः नास्मि इति उक्त्वा कर्णः अस्त्रविद्यां ग्रहीतुम् आरब्धवान्। ततः एकस्मिन् दिवसे फलमूलसमित्कुशकुसुमादीनाम् आहरणाय गुरुणा परशुरामेण सह गतवान्। गुरुः वनभ्रमणपरिश्रमेण कर्णस्य अङ्के निद्रातुम् आरब्धवान्। अदृष्टवशात् बज्रमुखः नाम कृमिः तस्य ऊरुयुगले दष्टवान्। परन्तु गुरोः निद्राव्याघातः स्यात् इति विचिन्त्य स कृमिदंशनपीडां सोढवान्। परन्तु क्षतजेन रुधिरेण आर्द्रगात्रः गुरुः निद्रातः उत्थाय सर्वं विज्ञाय क्रुद्धः सन् शापं दत्तवान् यत् युद्धकाले तव अस्त्राणि विफलानि भविष्यन्ति इति।

➢ एवम् अस्त्रवृत्तान्तम् निवेद्य वृत्तान्तस्य परीक्षणाय उद्युक्तः कर्णः। सः कथयति यत् अस्त्राणि सामर्थ्यरहितानि इव लक्ष्यन्ते, अश्वाः अपि दैन्येन चक्षूंषि निमिलन्ति, गजाः च दुर्गन्धमदधारायुक्ताः सन्तः संग्रामे निवर्तनं सूचयन्ति इव। शङ्खनादः अपि न श्रूयते। परन्तु विषादः मास्तु। रणे हतः चेत् स्वर्गः लभ्यते, जयः भवति चेत् यशः लभ्यते, अतः रणे निष्फलता नास्ति। अपि च, युद्धेषु अनिवर्तिताशाः इमे मया रक्षिताः गरुडसमानवेगाः अश्वाः

माम् रक्षन्तु इति। इत्थं विचिन्त्य कर्णस्य मनः प्रसन्नं जातम्। प्रसन्नः सन् स कथयति यत् पाण्डवसैन्यानाम् अग्रभागं प्रविश्य धर्मराजं युधिष्ठिरं बद्ध्वा शरेण अर्जुनं हनिष्यामि, तेन च हतसिंहं वनमिव युद्धक्षेत्रं सर्वेषां प्रवेशयोग्यं भविष्यति।

➢ एवं विचिन्त्य रथम् आरुह्य अर्जुनस्य समीपं स्वस्य रथं नेतुं शल्यराजं निर्दिदेश कर्णः।

पाठन्तप्रश्नाः

१. कर्णेन कृतं परशुरामस्य वर्णनं प्रकटयत।

२. युद्धे कर्णस्य अशुभलक्षणानि वर्णयत।

३. कर्णस्य शापवृत्तान्तं सविस्तरं लिखत।

४. कर्णस्य हयानां वैशिष्ट्यानि लिखत।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि-१

१. कुन्तिः।

२. जामदग्न्यः परशुरामः।

३. ब्राह्मणेभ्यः।

४. वज्रमुखेन कृमिणा कर्णस्य ऊरुद्वये कृत्ते।

५. परशुरामः कर्णाय शापं ददाति- कालविफलानि अस्त्राणि ते भविष्यन्ति इति।

उत्तराणि-२

६. रणे (वीरः) हतः अपि स्वर्गं लभते, जित्वा यशः लभते इति लोके उभे बहुमते। अतः रणे निष्फलता नास्ति।

७. काम्बोजदेशे।

८. अर्जुनम्।

॥ इति सप्तदशः पाठः ॥

--)()(--